# घोरकष्टोद्धरण स्तोत्र

Ghorakashtoddharan Stotra — Deliverance from Grave Affliction · P. P. Vasudevanand Saraswati (Tembe Swami)

श्रीपाद श्रीवल्लभ त्वं सदैव । श्रीदत्तास्मान् पाहि देवाधिदेव ॥
भावग्राह्य क्लेशहारिन् सुकीर्ते । घोरात्कष्टादुद्धरास्मान्नमस्ते ॥१ ॥

त्वं नो माता त्वं पिताप्तोऽधिपस्त्वं । त्राता योगक्षेमकृत् सद्गुरुस्त्वम् ॥
त्वं सर्वस्वं नोऽप्रभो विश्वमूर्ते । घोरात्कष्टादुद्धरास्मान्नमस्ते ॥२ ॥

पापं तापं व्याधिमाधिं च दैन्यं । भीतिं क्लेशं त्वं हराशु त्वदन्यम् ॥
त्रातारं नो वीक्ष ईशास्तजूर्ते । घोरात्कष्टादुद्धरास्मान्नमस्ते ॥३ ॥

नान्यस्त्राता नापि दाता न भर्ता । त्वत्तो देव त्वं शरण्योऽकहर्ता ॥
कुर्वात्रेयानुग्रहं पूर्णराते । घोरात्कष्टादुद्धरास्मान्नमस्ते ॥४ ॥

धर्मे प्रीतिं सन्मतिं देवभक्तिं । सत्संगाप्तिं देहि भुक्तिं च मुक्तिम् ॥
भावासक्तिं चाखिलानन्दमूर्ते । घोरात्कष्टादुद्धरास्मान्नमस्ते ॥५ ॥

## फलश्रुति

श्लोकपञ्चकमेतद्यो लोकमङ्गलवर्धनम् ।
प्रपठेन्नियतो नित्यं स श्रीदत्तप्रियो भवेत् ॥